# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा –एप्रिल - 2019

**कक्षा – अचार्य (SEM-4)** **प्रश्नपत्रम् – 5** गुणाः –70

विषयः – पुराणेतिहासः **कोड –C.E.5.4.4** समयः - 11 तः 2 पर्यन्तम्

दिनाङ्कः –13/04/2019 सन्दर्भग्रन्थः – विष्णुपुराणे 4-6 अंशाः

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः-1 कश्चिदेकस्य ससन्दर्भं विवेचनं कुरुत।** **05**

(1) तस्मिन्नशेषौजसि सर्वरुपिण्यव्यक्तविस्पष्टतनावनन्ते।

ममाचलं चित्तमपेतदोषं सदास्तु विष्णावभवाय भूयः॥

(2) न नूनं कार्तवीर्यस्य गतिं चास्यान्ति पार्थिवाः।

यज्ञैर्दानैस्तपोभिर्वा प्रश्रयेम श्रुतेन च॥

**प्रश्नः-2 एकं सविस्तरं लिख्यताम्।** **10**

(1) सगरसौदासखट्वाङ्गानां वर्णनं कृत्वा रामस्य पवित्रं चरितं लिखत।

(2) गङ्गापानप्रसङ्गं विलिख्य स्यमन्तकमणिकथां लिकत।

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः-3 कश्चिदेकस्य ससन्दर्भं विवेचनं कुरुत।** **05**

(1) ब्रह्मक्षत्रस्य यो योनिवंशो राजर्षिसन्कृतः।

क्षेमकं प्राप्य राजानं संस्थानं प्राप्यते कलौ॥

(2) योऽनन्तररूपोऽखिलविश्वरूपो गर्भेऽपि लोकान्वपुषा बिभर्ति।

प्रसीदतामेष स देवदेवी यो माययाविष्कृत बालरूपः॥

**प्रश्नः-4 एकस्य समीक्षा कार्या।** **10**

(1) कलियुगीयनृपाणां वर्णनं कुरुत।

(2) भगवतः गर्भप्रवेशः देवगणेन कृता देवकीस्तुतिः।

**तृतीयान्वितिः (Unit-3)**

**प्रश्नः-5 कश्चिदेकस्य ससन्दर्भं विवेचनं कुरुत।** **05**

(1) अप्येष पुष्ठे मम हस्तपद्मं करिष्यति श्रीमदनन्तर्मूर्तिः।

यस्याङ्गुलिस्पर्शहताखिलाधैरवाप्यते सिद्धिरपास्तदोषा॥

(2) स त्वं प्रसीद परमेश्वर पाहि विश्वमंशावतार करणैर्न ममासि पुत्रः।

आब्रह्मपादपमिदं जगदेतदीश त्वत्तो विमोहयसि किं पुरुषोत्तमास्मान्॥

**प्रश्नः-6 एकं सविस्तरं लिख्यताम्।** **10**

(1) मुचुकुन्देन कृतास्तुतिः।

(2) रुक्मिणिहरणकथां ग्रन्थोक्तदिशा लिखत।

**प्रश्नः-7 कश्चिदेकस्य ससन्दर्भं विवेचनं कुरुत।** **05**

(1) दिव्यज्ञानोपपन्नास्ते विप्रलब्धाः कुमारकैः।

मुनयः कुपिताः प्रोचुर्मुसलं जनयिष्यति ॥

(2) ज्ञानप्रवृत्तिनियमैक्यमथाय पुंसो भोगप्रदानपटवे त्रिगुणात्मकाय।

अव्याकृताय भवभावनकारणाय वन्दे स्वरूपभवनाय सदाजराय ॥

**प्रश्नः-8 एकं सविस्तरं लिख्यताम्।** **10**

(3) कलिधर्मनिरूपणं क्रियताम्।

(4) विष्णुपुराणस्य षष्ठांशः।

## चतुर्थान्वितिः (Unit-4)

**प्रश्नः-9 दशानां लघूत्तराणि लिखत।** **10**

(1) ब्रह्मणः कति मानसपुत्राः?

(2) पुराणानि कति ?

(3) विष्णुपुराणे कति अंशाः?

(4) विष्णुपुराणे कति अध्यायाः?

(5) भगवतः कति अवताराः?

(6) रेवती का असीत् ?

(7) कंसः देवक्याः कति पुत्रान् जधान ?

(8) शिष्यपरंपरावर्णनं कस्मिन् अंशे आगच्छति?

(9) अक्रूरस्य गोकुलयात्रा केन कारणेन जाता ?

(10) अम्बरीषः कस्मिन् वंशे जातः?

(11) कस्य शापात् ययातिः जरामवाप ?

(12) भगवान् सूर्यः कस्मै मणिं दत्तवान् ?

(13) श्रीकृष्णस्य नामकरणं केन कृतम्?

(14) उषायाः पिता कः?

(15) षष्ठे अंशे कति अध्यायाः सन्ति ?